दर्पणोक्ते अर्थालङ्कारभेदे, "हन्त सान्द्रेण रागेण भृतेऽपि हृदये मम । गुणगौर ! निषण्णोऽपि कथं ? नाम न रज्यसीति । अत्रातिरक्तहृदयसंबन्धात् उचितमपि रक्तत्वं न निष्पन्नमिति हेतुसद्भावेऽपि तद्रूपाननुहरणात्तथात्वम् ।

**अतद्गुणसंविज्ञान** पु० न तस्य गुणीभूतस्य सम्यक् ज्ञानं यत्र । शाब्दिकोक्ते बहुव्रीहिभेदे । यथा लम्बकर्णमानयेत्यादौ गुणीभूतकर्णादेरपि धर्म्मिद्वारा आनयनेऽन्वयस्तथा दृष्टसमुद्रमानयेत्यादौ गुणीभूतस्य समुद्रस्य नानयनेऽन्वयः इत्यतः लम्बकर्णइत्यादिस्तद्गुणसंविज्ञानः दृष्टसमुद्र इत्यादिश्च अतद्गुणसंविज्ञानः बहुव्रीहिरिति भेदः । एवमुदाहरणान्तराणि ज्ञेयानि ।

**अतन्त्र** त्रि० न तन्त्रं कारणं तदधीना विवक्षा वा यस्य । कारणानधीने विवक्षाशून्ये च । "ह्रस्वग्रहणमतन्त्रमिति" सिद्धान्तकौ० । [निद्रारहिते, अनलसे च ।

**अतन्द्र** त्रि० नास्ति तन्द्रा निद्रा, तत्सदृशम् आलस्यं वा यस्य ।

**अतन्द्रित** त्रि० तन्द्रा जाताऽस्य तार० इतच् न०त० । अजातनिद्रे अनलसे च "अतन्द्रिता सा स्वयमेव वृक्षकान्" इति कुमा० ।

**अतप्ततनु(नू)** त्रि० न तप्ता पयोव्रतादिना तनुरस्य । पयोव्रतादिना देहकार्श्यकारके । दीर्घान्तपाठोप्यत्रैव "विश्वतोऽतप्ततनूर्न तदाम" इति तां० ब्रा० । न तप्ता तप्तमुद्रया तनुरस्य । तप्तमुद्रया अङ्कतचिह्ने त्रि० "नातप्ततनुरिति" श्रुतिस्तत्परतयैव वैष्णवैर्व्याख्याता । [निर्हेतुके, तर्कहीने च ।

**अतर्क** त्रि० तर्क्यतेऽनेन तर्कस्तर्कहेतुः स नास्ति यस्य ।

**अतर्कित** त्रि० न तर्कितम् । तर्कहेतुव्यापारानुसन्धानेन हठादागते, अनुमितभिन्ने च । "अतर्कितमुपस्थितमिति" पुरा० ।

**अतल** न० अस्य भूखण्डस्य तलं पृषो० इदमोऽत्वम् । सप्तपातालमध्ये प्रथमखण्डे भूमेरधोभागे । तल्लोकाश्च सप्त, अतल, वितल, सुतल, तलातल, महातल, रसातल, पातालसंज्ञका अधोधस्तिष्ठन्ति तेषां निवेशस्थानञ्च "स्वादूदकान्तर्वेड्यानलोऽसौ पातालोकाः पृथिवीपुटानीति" सि० शि० गो० उक्तम् । विशेषस्तत्तच्छब्दे वक्ष्यते । तलशून्ये त्रि० नास्ति तलः प्रतिष्ठा यस्य । अप्रतिष्ठे त्रि० । [गभीरे ।

**अतलस्पर्श** त्रि० न तलस्याधोभागस्य स्पर्शो यत्र ब० । अति-

**अतलस्पृश्** त्रि० न तले स्पृश्यते कर्म्मणि क्विन् । अगाधे ।

**अतस्** अव्य० इदम्+तसिल् । एतद्धेत्वर्थे "अथातो ब्रह्म जिज्ञासेति" सूत्रे अतःशब्दो हेत्वर्थ इति भाष्यम् । "अथातो धर्म्मजिज्ञासेति" जै० । "अतश्चराचरं विश्वमिति" कुमा० ।

**अतस** पु० अत-गतौ असच् । वाते । सातत्यार्थकात् अतः असच्, आत्मनि । गौरादित्वात् ङीषि अतसी । (तिसि, मसिना) इति ख्याते वृक्षे स्त्री । "तस्यातसीसूनसमानभास" इति माघः । "अतसीपुष्पवर्णाभेति" दुर्गाध्याने अतसी शण इति स्वार्त्तोक्तेः शणवृक्षे च । तत्सूत्रजाते क्षौमवस्त्रे न० ।

**अति** अव्य० अत-इ । पूजायाम्, उत्कर्षे, अतिक्रमणे, च । स्वभावोह्यतिरिच्यते "तेषु हार्दी तथाप्यतीति" चण्डी० । तत्पुरुषपूर्ब्बपदस्थः अतिक्रान्तार्थे "अत्यादयः क्रान्ताद्यर्थे द्वितीययेति" वा० । अतिराजो अतिश्वो । उत्कर्षार्थे कुगतिप्रादयस्तेति समासे अतिधनमतिबलमिति । "विक्रमातिक्रमाबुद्धिभृशार्थातिशयेष्वतीति" गणरत्नोक्तेश्च विक्रमादिषु तत्र, विक्रमे अतिरथः, (रथाधिकविक्रमवान्) अतिक्रमे, अतिमति (बुद्ध्यतिक्रमः) अबुद्धौ अतिगहनम् (बुद्धेरविषयः) भृशे अतितप्तम् (भृशतप्तम्) अतिशये अतिवेगः (अतिशयितो वेगः) एवमन्यान्यप्युदाहार्याणि । अस्य क्रियायोगे उपसर्गता अतिक्रमे पूजायाञ्च कर्म्मप्रवचनीयसंज्ञा तेन तद्योगे द्वितीयादि तत्रातिक्रमे राजानमति, पूजायाम् अतिस्तुतमित्यादौ उपसर्गत्वबाधाञ्च षत्वम् ।

**अतिकथ** त्रि० अतिक्रान्तः कथाम् । कथनायोग्ये, अश्रद्धेये, नष्टे च । [भाषणे च ।

**अतिकथा** स्त्री अत्युत्कटा कथा । अत्युत्कटवर्णने, व्यर्थ-

**अतिकन्दक** पु० अतिरिक्तः कन्दः यस्य कप् । हस्तिकन्दनामके वृक्षे । [अत्यन्ताकर्षके च ।

**अतिकर्षण** त्रि० अत्यन्तं कर्षति कृष-ल्यु । अत्यन्ततापदायके,

**अतिकश** त्रि० अतिक्रान्तः कशाम् तत्प्रहारमनादृत्य स्वेच्छानुसारेण प्रवृत्तत्वात् अत्या० त० । कशाप्रकारमुल्लङ्घ्य यथेच्छव्यापृते दुर्दान्ते अश्वे ।

**अतिकाय** त्रि० अत्युत्कटः कायोऽस्य । विकटदेहे, रावणपुत्रे राक्षसभेदे पु० तत्कथा लङ्काकाण्डे "चकोप स महातेजा ब्रह्मदत्तवरो विभुः अतिकायो महावीर्य्य इत्युपक्रमस्य "आचचक्षे महातेजा रामाय रावणानुजः । दशग्रीवो महातेजाः राजा वैश्रवणात्मजः । तस्य पुत्रो ह्यसौ वीरो रावणप्रतिमोरणे इति" तस्य सामर्थ्यं विभीषणेन निवेदिते लक्ष्मणेन सह तस्य युद्धमासीत् तेन च तस्य शिरश्छिन्ने इति "तदातिकायस्य शिरो जहारेति" रामा० लङ्का० ।

**अतिकुल्व** त्रि० अति+कुल-व-किच्च । अतिलोमशे ।

**अतिकृच्छ्र** न० अतिक्रान्तं कृच्छ्रं प्राजापत्यं तदधिकदुःख-